No of Questions : 30

No of Pages : 6

नामांक

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

# माध्यमिक परीक्षा, 2019
# तृतीय भाषा–संस्कृतम्
# मॉडल पेपर षष्ठः

**समय : 3.15 घण्टे** **पूर्णांक : 80**

**परीक्षार्थियों के लिए के लिये सामान्य निर्देश :–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–माध्यमेन एव लेखनीयानि।

---

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

मल्लेषु मल्लः सूरजमल्लः शरीर–सौष्ठवस्य, सौन्दर्यस्य, सरलतायाः, चारित्रिक–दृढ़तायाः, धार्मिकतायाः, वीर–तायाः, करुणायाः, त्यागस्य, बलिदानस्य, शरणागत–रक्षणस्य, प्रजावात्सल्यस्य, राष्ट्रवादस्य, सर्वपन्थसमादरस्य च साक्षात् प्रतिमूर्तिरासीत्। सूरजमल्लः स्वकालखण्डस्य अत्यन्तं दुर्धर्षः, अतिशयेन तेजस्वी, नितान्तं नीतिनिपुणः, अद्वितीयश्च योद्धा आसीत्। तेन प्रायशः सप्तसु महत्युद्धेषु विजयश्रीः चुम्बिता। कविः सूदनः स्वकीये 'सुजानचरितम्' इति काव्ये तेषां सप्त–युद्धानां रोमाञ्चकं सजीवं च वर्णनम् अकरोत्।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

स्वातन्त्र्यान्दोलनेऽपि सक्रियः स्वामिकेशवानन्दः नैकवारं वर्षाणि यावत् कारागारेष्वपि निबद्धः।
शिक्षा–प्रसाराय कृतभूरिश्रमेण स्वामिना 'ग्रामोत्थान–विद्यापीठ, संगरिया' इत्यस्य संस्थापनं कृतम्। ग्राम्यक्षेत्रेषु तेन उपत्रिशतं (300) शिक्षाशालाः, उपपञ्चाशच्च (50) छात्रावासाः स्थापिताः। शिक्षाक्षेत्रे स्वामिनः श्रमः पं. मदनमोहनमालवीयस्य पुरुषार्थं स्मारयति। योग्यमेव स्वामिवर्यः 'शिक्षा–सन्तः' इति विरुदेन भूषितः।
समाज–सुधारकः केशवानन्दः मरुप्रदेशे व्याप्तानां मृत्यु–भोजनं, बाल–विवाहः, नार्युत्पीडनं, यौतुकप्रथा, अवगुण्ठनप्रथा, अस्पृश्यता, मद्यसेवनम् इत्यादीनां कुप्रथानाम् निवारणाय सदैव सचेष्टः आसीत्।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

केशवं पतितं दृष्ट्वा, द्रोणः हर्षमुपागतः।
रुदन्ति कौरवाः सर्वे, हा! हा! केशव केशव ।।

**अथवा**

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

न भोगभवने रमणीयम्
न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्।
लोकहितं मम करणीयम्।।

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 4

अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।।

**अथवा**

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 4

गावः प्रसन्नाः मनुजाः प्रसन्नाः देवाः प्रसन्नाः व्रतदानयज्ञैः।
किं नाम तद्यन्न मरौ समृद्धं विद्या–समृद्धो भवता विधेयः।।

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

**प्रथमः भिल्लः** – हा भगवन् अद्य कीदृशः समयः आगतः? प्रतापः अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः अस्ति।

**द्वितीयः भिल्लः** – न जाने अस्य मेवाड़देशस्य भाग्ये किं लिखितम् अस्ति। हे दीनदयालो! परमेश्वर!! त्वम् अपि अद्य इयान् निष्ठुरः कथं जातः!

**तृतीयः भिल्लः** – हा धिक्! वराकस्य समीपे न जीवनसामग्री न च युद्धसामग्री एव विद्यते। मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः? (रोदिति)

**अथवा**

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

**राजा** – उपगम्य। (सस्मितम्) अयि भो महर्षिपुत्र!

**तापसी** – भद्रमुख! न खल्वयमृषिकुमारः।

**राजा** – आकारसदृशं चेष्टितमेवास्य कथयति। स्थान–प्रत्ययात्तु वयमेवंतर्किणः। (इति यथाभ्यर्थितमनुतिष्ठति)

**राजा** – (बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः?

**तापसी** – पुरुवंशः।

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 3

1. 'जयतु सुरभारति' इति गीतिः कस्मात् ग्रन्थात् संकलिता?
2. समरस्य सारं किमस्ति?
3. मूढ़ैः कुत्र रत्नसंज्ञा विधीयते?
4. विद्या कैः वंद्या सदा?
5. गगने मेघान् अवलोक्य कः नन्दति?
6. प्रतापस्य प्रतिज्ञा का?
7. पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं कस्य सकाशात् शिक्षरेन्?
8. वायसस्य नाम किम्?

**निर्देशः– प्रश्न संख्या 6–9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** <u>शस्त्रेण</u> रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते। 1

**7.** <u>अल्पानां वस्तूनाम्</u> अपि संहतिः कार्यसाधिका। 1

**8.** सा <u>त्रिभुवनेषु</u> धन्या अस्ति। 1

**9.** राजानः <u>देशरक्षाकर्त्तव्यात्</u> विमुखाः आसन्। 1

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**11.** अधोलिखितं गद्यांशं पठित्वा एकदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

दीपावली अस्माकं राष्ट्रियोत्सवः वर्तते। अस्मिन् उत्सवे सर्वे जनाः परस्परं भेदभावं विस्मृत्य आनन्दमग्नाः भवन्ति। त्रेतायुगे कैकेय्याः वरयाचनात् अयोध्यायाः राज्ञा दशरथेन रामाय चतुर्दशाणां वर्षाणां वनवासः प्रदत्तः। श्रीरामः अस्मिन् एव दिने सीतालक्ष्मणाभ्यां सह अयोध्यां प्रत्यावर्तितवान्। तान् स्वागतं व्याहर्तुम् अयोध्यावासिनः नगरे सर्वत्र दीपान् प्रज्वालितवन्तः। तदा आरभ्य अद्यावधिः प्रतिवर्षं कार्त्तिकमासे अमावस्यायां तिथौ भारते दीपावली–महोत्सवः महता उत्साहेन आयोजितः भवति।

दीपावल्यां जनाः गृहाणि परिष्कुर्वन्ति। अस्मिन्नवसरे ते स्वमित्रेभ्यः बन्धुभ्यश्च उपहारान् यच्छन्ति, परस्परम् अभिनन्दन्ति च बालकेभ्यः मिष्ठान्नं यच्छन्ति। सर्वे जनाः लक्ष्मी–गणेशयोः पूजनं कुर्वन्ति। पितरः स्वसन्ततिभ्यः स्फोटनकानि ददति। अस्मिन् महोत्सवे सर्वे सर्वेभ्यः सुखाय समृद्धये च शुभेच्छाः प्रकटयन्ति।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) कस्याः वरयाचनात् दशरथेन रामाय वनवासः प्रदत्तः?1
   (ख) कदा जनाः गृहाणि परिष्कुर्वन्ति? 1
   (ग) सर्वे जनाः किम् विस्मृत्य आनन्दमग्नाः भवन्ति?1
   (घ) दशरथेन रामाय कति वर्षाणां वनवासः प्रदत्तः?1
   (ङ) भारते कदा दीपावली–महोत्सवः आयोजितः भवति?1
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) 'राज्ञा दशरथेन' इत्यनयोः पदयोः किं विशेषणपदम्?1
   (ख) अस्मिन् अनुच्छेदे 'ते' इति सर्वनामपदस्य स्थाने किं संज्ञापदम्? 1
   (ग) "बालकेभ्यः मिष्ठान्नं यच्छन्ति"-इति वाक्ये क्रियापदं किम्? 1
   (घ) उपर्युक्तगद्यांशात् 'दुःखाय' इति पदस्य विलोमपदं चित्वा लिखत। 1

**12.** अधोलिखितपदयोः संधिविच्छेदं कृत्वा संधेः नामापि लिखतु।

1. भवनम्1
2. नैवम् 1

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु।

1. तव + ऐश्वर्यम् 1
2. मृगः + इति 1

**14.** अधोलिखित वाक्येषु रेखांकित समस्त पदानां विग्रहं अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत–

1. भूकम्पः <u>महाकम्पनं</u> जनयति। 1
2. तव <u>मातापितरौ</u> कुत्र अगच्छताम्? 1
3. सः देशवासिनः <u>यथाशक्तिः</u> प्रबोधितवान्। 1

**15.** निम्नलिखितवाक्येषु रेखांकितपदेषु प्रयुक्तविभक्तिं तत् कारणं च लिखत–

1. <u>तृणात्</u> संजायते क्षीरं। 1
2. अहं तु <u>त्वया</u> सह एव पठिष्यामि। 1
3. <u>मह्यं</u> संगीतं रोचते। 1

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. इदं स्थलं .......... अस्ति। (रम् + अनीयर्) 1
2. बहुभाषणं .......... प्रकटयति। (मूर्ख + त्व) 1

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. सः धनं लभमानः तत्र गतः। 1
2. अस्माभिः परस्परं स्नेहेन वसितव्यम्। 1

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| यथा, एव, कुत्र, अपि |
|---|

1. रामः .......... च इतस्तावद् वयस्य। 1
2. सा .......... गच्छति? 1
3. धर्मः .......... जयः तथा। 1

**निर्देशः– प्रश्न संख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** रामः रावणं हन्ति। 1

**20.** त्वं फले खादसि। 1

**21.** तेन पत्रं लिख्यते। 1

**22.** घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–







1. प्रातः .......... वादने विद्यालयं गच्छामि। 1
2. मध्याह्ने .......... वादने विद्यालयात् गृहम् आगच्छामि। 1

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. आशीर्वादाः रक्षां करोति। 1
2. ते नार्यः हसन्ति। 1
3. त्वं गृहं गच्छामि। 1

**24.** नगरपालिकाप्रशासकाय स्वच्छता व्यवस्थायै प्रति पत्रं लिखत। 4

**अथवा**

**24.** विनीतः जयपुरनगरे वसति। तस्य मित्रं प्रगीतः कर्णपुरनगरे वसति। विनीतेन गणतन्त्रदिवसस्य शोभायात्रायां भागः गृहीतः। सः स्वानुभवान् स्वमित्रं प्रगीतं प्रति पत्रे लिखति। भवान् मञ्जूषातः पदानि चित्वा पत्रं पूरयतु। 4

| **मञ्जूषा–** गृहीतः, नमस्ते, मम, वाद्यवृन्दम्, राजमार्गम्, लोकनृत्यानि, गणतन्त्रदिवससमारोहस्य, प्रमुखसञ्चालकः। |
|---|

जयपुरतः
दिनांकः 20.03.20....

प्रियमित्र प्रगीत!

..................

अत्र कुशलं तत्रास्तु। अहं ............ सज्जायां व्यस्तः आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन्

वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः ...........।

अस्माकं विद्यालयस्य ........... स्वकलायाः प्रदर्शनम् अकरोत्। अहं नृत्यस्य .......... आसम्। छात्राणां राष्ट्रगानस्य ओजोयुक्तध्वनिः .......... गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रम-प्रदर्शनानि विचित्रवर्णानि परिदृश्यानि ........... च दृष्ट्वा अहं गौरवान्वितः अस्मि। ........... बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। पितरौ वन्दनीयौ।

भवतः सुहृद्

विनीतः

**25.** मञ्जूषायाः उपयुक्तपदानि गृहीत्वा द्वयोः सख्योः संवादं पूरयत। 4

| |
|---|
| **मञ्जूषा-** स्थानान्तरणवशात्, कक्षायाम्, तव, विद्यालयात्, वससि, आगता, अहं, नवमकक्षा |

**मेघाः** - स्वागतं ते अस्यां ............।

**सुधाः** - धन्यवादाः।

**मेघाः** - प्रियसखि! किं ........... नाम?

**सुधाः** - मम नाम सुधा अस्ति।

**मेघाः** - सुधे! कस्मात् ............ आगता अस्मि?

**सुधाः** - अहं जयपुरनगरस्य केन्द्रीय विद्यालयात् आगता अस्मि।

**मेघाः** - अहमपि ............ पर्यन्तं तत्रैव अपठम्। पितु ........... अत्र आगता।

**सुधाः** - अहमपि अनेनैव कारणेन अत्र ...........।

**मेघाः** - अधुना त्वं कुत्र ...........?

**सुधाः** - अधुना ........... जवाहरनगरे वसामि।

**26.** अधोलिखितषड्वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु- 4

1. तुम दोनों पुस्तक पढ़ो।
2. पूनम संस्कृत लिखती थी।
3. वह पत्र लिखेगा।
4. मैं शहर जाऊँगा।
5. तुमने अपना पाठ पढ़ा।
6. हम सभी को अपना कार्य करना चाहिए।

**27.** अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट्वाक्यानि रचयतु- 3

| |
|---|
| **मञ्जूषा-** दुग्धदातृषु, कृषिप्रधाने, द्वौ श्रृंगौ, वसिष्ठ ऋषिः, अनेक वर्णाः, अमृतोपमम्। |



**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत– 3

| **मञ्जूषा–** शिक्षा, वार्षिकोत्सवः, पुरस्कार, कार्यक्रमः, धन्यवादं, विद्यालयं। |
|---|

मम विद्यालये .......... आयोजितः। अस्मिन् अवसरे .......... मंत्री मुख्य अतिथिः आसीत्। एकः सांस्कृतिक .......... अभवत्। छात्राणां कृते ..........– वितरणम् अभवत्। छात्राः .......... वधूः इव कृतवन्तः। प्राचार्यः .......... कृतवान्।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. श्रेष्ठिपुत्रः शक्तिकुमारः चिन्तामापन्नः तत्कथं गुणवद् विन्देयं कलत्रम्।
2. अस्ति द्रविडेषु काञ्ची नाम नगरी।
3. कामपि लक्षणवतीं कन्यां विलोक्य स पृच्छति– भद्रे! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम्?
4. पेयोपहारपूर्वं भोजनं घृतसहितोदनं व्यञ्जनं च तस्मै दत्तवती।
5. ततो व्यंजनादिकं च तया सम्पादितम्।
6. भुक्ते तु तस्मिन् तयास्य शयनव्यवस्थापि कृता।

□□□□□□□

# राजस्थान बोर्ड परीक्षा 2019
# 10वीं कक्षा
# तृतीय भाषा–संस्कृतम्
# मॉडल पेपर–षष्ठः

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

**परीक्षार्थियों के लिये सामान्य निर्देश :–**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–माध्यमेन एव लेखनीयानि।

---

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

मल्लेषु मल्लः सूरजमल्लः शरीर–सौष्ठवस्य, सौन्दर्यस्य, सरलतायाः, चारित्रिक–दृढ़तायाः, धार्मिकतायाः, वीरतायाः, करुणायाः, त्यागस्य, बलिदानस्य, शरणागत–रक्षणस्य, प्रजावात्सल्यस्य, राष्ट्रवादस्य, सर्वपन्थसमादरस्य च साक्षात् प्रतिमूर्तिरासीत्। सूरजमल्लः स्वकालखण्डस्य अत्यन्तं दुर्धर्षः, अतिशयेन तेजस्वी, नितान्तं नीतिनिपुणः, अद्वितीयश्च योद्धा आसीत्। तेन प्रायशः सप्तसु महत्युद्धेषु विजयश्रीः चुम्बिता। कविः सूदनः स्वकीये 'सुजानचरितम्' इति काव्ये तेषां सप्त–युद्धानां रोमाञ्चकं सजीवं च वर्णनम् अकरोत्।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत गद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'महाराजः सूरजमल्लः विजयते' शीर्षक पाठ से उद्धृत है। इस गद्यांश में भरतपुर के महाराजा सूरजमल्ल की प्रसिद्धि, साहस, वीरता एवं उत्साह का वर्णन किया गया है।

**हिन्दी–अनुवाद–** वीरों में वीर सूरजमल्ल शरीर–सौष्ठव, सौन्दर्य, सरलता, चारित्रिक दृढ़ता, धार्मिकता, वीरता, करुणा, त्याग, बलिदान, शरणागत–रक्षण, प्रजा–वात्सल्य, राष्ट्रवाद और सर्वधर्म–सद्भाव की साक्षात् मूर्ति थे। सूरजमल्ल अपने समय के अत्यन्त दुर्धर्ष (जिसे सरलता से हराया न जा सके), अत्यधिक तेजस्वी, पूर्णतः नीति–निपुण और अद्वितीय योद्धा थे। उन्होंने लगभग सात महायुद्धों में विजयश्री प्राप्त की थी। कवि सूदन ने अपने 'सुजानचरितम्' नामक काव्य में उन सात युद्धों का रोमांचक और सजीव वर्णन किया है।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

स्वातन्त्र्यान्दोलनेऽपि सक्रियः स्वामिकेशवानन्दः नैकवारं वर्षाणि यावत् कारागारेष्वपि निबद्धः।

शिक्षा–प्रसाराय कृतभूरिश्रमेण स्वामिना 'ग्रामोत्थान–विद्यापीठ, संगरिया' इत्यस्य संस्थापनं कृतम्। ग्राम्यक्षेत्रेषु तेन उपत्रिशतं (300) शिक्षाशालाः, उपपञ्चाशच्च (50) छात्रावासाः स्थापिताः। शिक्षाक्षेत्रे स्वामिनः श्रमः पं. मदनमोहनमालवीयस्य पुरुषार्थं स्मारयति। योग्यमेव स्वामिवर्यः 'शिक्षा–सन्तः' इति विरुदेन भूषितः।

समाज–सुधारकः केशवानन्दः मरुप्रदेशे व्याप्तानां मृत्यु–भोजनं, बाल–विवाहः, नार्युत्पीडनं, यौतुकप्रथा, अवगुण्ठनप्रथा, अस्पृश्यता, मद्यसेवनम् इत्यादीनां कुप्रथानाम् निवारणाय सदैव सचेष्टः आसीत्।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत गद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'कर्मयोगी स्वामी केशवानन्दः' शीर्षक पाठ से उद्धृत है। इसमें स्वामी केशवानन्द के स्वतन्त्रता आन्दोलन में भाग लेने तथा शिक्षा एवं समाज–सुधार के क्षेत्र में किये गये कार्यों का प्रेरणास्पद वर्णन किया गया है।

**हिन्दी–अनुवाद–** स्वतन्त्रता–आन्दोलन में भी सक्रिय स्वामी केशवानन्द अनेक बार वर्षों तक जेलों में बन्द रहे।

शिक्षा–प्रसार के लिए अत्यधिक परिश्रम करने वाले स्वामीजी के द्वारा 'ग्रामोत्थान विद्यापीठ, संगरिया' नामक संस्था की स्थापना की गई। ग्रामीण क्षेत्रों में लगभग 300 शिक्षाशालाएँ और लगभग 50 छात्रावास स्थापित किए। शिक्षा के क्षेत्र में स्वामीजी का परिश्रम पं. मदनमोहन मालवीय के पुरुषार्थ का स्मरण कराता है। योग्य स्वामी महोदय 'शिक्षा–सन्त' इस स्तुति वचन से सुशोभित हुए।

समाज–सुधारक केशवानन्द मरु–प्रदेश में व्याप्त मृत्यु–भोज, बाल–विवाह, नारी–उत्पीड़न, दहेज–प्रथा, घूँघट–प्रथा, छूआछूत, शराब का सेवन आदि कुप्रथाओं को दूर करने के लिए हमेशा सचेष्ट (क्रियाशील) रहते थे।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

केशवं पतितं दृष्ट्वा, द्रोणः हर्षमुपागतः।
रुदन्ति कौरवाः सर्वे, हा! हा! केशव केशव ।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत श्लोक हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'वाक्केलिः' शीर्षक पाठ से उद्धृत है। यह श्लोक एक पहेली के रूप में है, जिसमें श्लेष अलंकार के चमत्कार से दो अर्थ वर्णित हैं–

**हिन्दी-अनुवाद-** प्रस्तुत पहेली के दो अर्थ हैं, प्रथम अर्थ संगत नहीं है तथा दूसरा अर्थ तर्कसंगत प्रतीत होता है। यथा-

**प्रथम-अर्थ-** श्रीकृष्ण को गिरा हुआ देखकर द्रोणाचार्य प्रसन्न हुए। सभी कौरव रोने लगते हैं- हाय कृष्ण! हाय कृष्ण!

**द्वितीय अर्थ-** जल में शव को देखकर कौआ प्रसन्न हुआ, किन्तु सभी श्रृगाल (गहन जल में जाने में असमर्थ पाकर दूर से ही देखते हुए) रोने लगते हैं- हाय जल में शव! हाय जल में शव!

**अथवा**

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

न भोगभवने रमणीयम्
न च सुखशयने शयनीयम्।
अहर्निशं जागरणीयम्।
लोकहितं मम करणीयम्।।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत पद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'लोकहितं मम करणीयम्' शीर्षक पाठ से उद्धृत है। इसमें अत्यन्त सरल संस्कृत-गीत के माध्यम से भोग-विलास को त्याग कर एवं सावधान रहते हुए लोक-कल्याण करने की प्रेरणा दी गई है। कवि कहता है कि मनुष्य को-

**हिन्दी-अनुवाद-** हमेशा भौतिक-संसार में रमण नहीं करना चाहिए, सुखशयन में शयन नहीं करना चाहिए, दिन-रात जागृत रहना चाहिए अर्थात् सावधान/सचेत रहना चाहिए और लोक-कल्याण करना चाहिए। अर्थात् लोक कल्याण ही मेरा कर्त्तव्य है, ऐसा सदैव स्मरण रखना चाहिए।

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत-व्याख्यां करोतु- 4

अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।।

**उत्तरम् :**

**प्रसङ्ग-** प्रस्तुतश्लोकः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'सुभाषित-रत्नानि' इतिशीर्षकपाठाद् उद्धृतः। अस्मिन् श्लोके विद्यायाः धनस्य चार्जनं कृत्वा धर्माचरणस्यापि जीवने महत्त्वं प्रदर्शितम्।

**संस्कृत-व्याख्या-** जीवने विद्यायाः धनस्य धर्मस्य च चिन्तनं कथं कर्त्तव्यम् इति प्रतिपादयन् श्लोकेऽस्मिन् कथितं यत् बुद्धिमान् जनः अहम् अजरः (जरारहितः) अमरः (मरणरहितः) च इति मत्वा विद्याप्राप्तिविषये धनप्राप्तिविषये च विचारयेत् अर्थात् विद्यां धनं च प्राप्नुयात् तथा च यमराजेन मरणासन्नः इव मत्वा धर्माचरणं कुर्यात् अर्थात् मृत्युः कदापि भवितुमर्हति, अतः सदैव धर्माचरणं कर्त्तव्यम्। मृत्युकाले धर्मः एव सहायकः भवति।

**विशेषः-** अत्र कविना प्रेरणा प्रदत्ता यत् जीवने विद्यायाः धनस्य चार्जनं तु सततं कर्त्तव्यम्, किन्तु मृत्युः कदापि भवितुं शक्नोतीति मत्वा धर्माचरणमपि कुर्यात्। यतोहि मृत्युकाले धर्मः एव सहायकः भवति।

**अथवा**

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत-व्याख्यां करोतु- 4

गावः प्रसन्नाः मनुजाः प्रसन्नाः देवाः प्रसन्नाः व्रतदानयज्ञैः।
किं नाम तद्यन्न मरौ समृद्धं विद्या-समृद्धो भवता विधेयः।।

**उत्तरम् :**

**प्रसङ्गः-** प्रस्तुतश्लोकः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दना' इत्यस्य 'मरुसौन्दर्यम्' इतिशीर्षकपाठाद् उद्धृतः। अस्मिन् श्लोके कविना मरुप्रदेशस्य सर्वविधसमृद्धिं सौन्दर्यञ्च वर्णितम्।

**संस्कृत-व्याख्या-** प्रस्तुतश्लोके मरुप्रदेशस्य समृद्धिविषये वर्णितं यत् मरुप्रदेशे धेनवः तुष्टाः सन्ति, मानवाः, सन्तुष्टाः सन्ति, तथा च व्रतेन दानेन यज्ञेन च देवताः सन्तुष्टाः सन्ति। मरुप्रदेशे एतादृशं किं नास्ति येन मरुदेशः सम्पन्नः नास्ति? अर्थात् पूर्णतः समृद्धः वर्तते। भवद्भिः एषः मरुप्रदेशः विद्यया सम्पन्नः करणीयः।

**विशेषः-** अत्र कविना मरुप्रदेशस्य समृद्धेः शोभनं चित्रणं कृतम्। मरुप्रदेशे पशवः, मानवाः देवाश्च सर्वे प्रसन्नाः सन्ति, यतोहि तत्र तेषां मनोनुकूलानि सर्वाणि सुखसाधनानि सन्ति।

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत-व्याख्यां करोतु- 3

**प्रथमः भिल्लः** - हा भगवन् अद्य कीदृशः समयः आगतः? प्रतापः अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः अस्ति।

**द्वितीयः भिल्लः** - न जाने अस्य मेवाड़देशस्य भाग्ये किं लिखितम् अस्ति। हे दीनदयालो! परमेश्वर!! त्वम् अपि अद्य इयान् निष्ठुरः कथं जातः!

**तृतीयः भिल्लः** - हा धिक्! वराकस्य समीपे न जीवनसामग्री न च युद्धसामग्री एव विद्यते। मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्यामः? (रोदिति)

**उत्तरम् :**

**प्रसङ्ग-** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दना' इत्यस्य 'स्वदेशं कथं रक्षेयम्' इतिशीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री कांकरेण विरचिता एकांकी वर्तते।

प्रस्तुतांशे स्वसहचरैः सह महाराणाप्रतापं स्वदेशात् विमुखम् अनुमाय भिल्लाः सदुःखं परस्परं विलपन्तीति वर्णितम्।

**संस्कृत-व्याख्या-**

**प्रथमः भिल्लः** - हाय भगवान्! अधुना कीदृशः कालः समागतः? महाराणाप्रतापः अपि स्वदेशं त्यक्त्वा अन्यत्र प्रस्थानं करोति।

**द्वितीयः भिल्लः** - एतस्य मेवाड़प्रदेशस्य भाग्ये विधिना किं रचितमस्तीति न जानामि। हे दीनदयालो! परमेश्वर!! त्वम् अपि एतावत् दयाहीनः केन प्रकारेण अभवत्?

**तृतीयः भिल्लः** - हा धिक्! दीनस्य प्रतापस्य समीपे जीवनसाधनमपि नास्ति न च समरसाधनम् अर्थाद् धन-सैन्यादिकं साधनमपि नास्ति। वयं स्वस्य मातृभूमेः दयनीयां दशां कथं अवलोकयिष्यामः?
(इत्थं विलपन् रोदनं करोति।)

**विशेषः-** अत्र भिल्लानां प्रतापं प्रति स्वामिभक्तिः, श्रद्धा, प्रेम-भावना, करुणा च प्रकटिता। ते प्रतापं खिन्नं दृष्ट्वा स्वयमपि पीड़िताः भवन्ति।

**अथवा**

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत-व्याख्यां करोतु- 3

**राजा** - उपगम्य। (सस्मितम्) अयि भो महर्षिपुत्र!

**तापसी** - भद्रमुख! न खल्वयमृषिकुमारः।

**राजा** - आकारसदृशं चेष्टितमेवास्य कथयति। स्थान-प्रत्ययात्तु वयमेवंतर्किणः। (इति यथाभ्यर्थितमनुतिष्ठति)

**राजा** - (बालकमुपलालयन्) न चेन्मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः?

**तापसी** - पुरुवंशः।

**उत्तरम् :**

**प्रसङ्ग-** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः

पाठोऽयम् महाकविकालिदासविरचितस्य 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य सप्तमांकात् संकलितः। अंशेऽस्मिन् राजा दुष्यन्तः यदा महर्षेः मारीचस्य आश्रमं प्रतिविशति तदा तत्र बालकस्य सर्वदमनस्य विषये तापसीभ्यां सह वार्तालापं यद् भवति तद् वर्णितम्।

**संस्कृत-व्याख्या-**

**राजा** – समीपं गत्वा। (मन्दहासपूर्वकम्) अयि भो ऋषिकुमार!

**तापसी** – हे भद्रमुख! निश्चयेन एषः मुनिपुत्रः नास्ति।

**राजा** – अयं तु अस्य क्रियाकलापेनैव ज्ञायते यदयम् ऋषिकुमारः नास्ति, तथापि स्थानस्य विश्वासादेव वयं एवं प्रकारेण चिन्तयामः। (इति कथयित्वा राजा तस्याः यथेच्छितं करोति)

**राजा** – (बालकं सर्वदमनं प्रति सस्नेहम्) यदि एषः ऋषिकुमारः नास्ति, तर्हि अस्य वंशः कः?

**तापसी** – पुरुवंशः वर्तते।

**विशेषः**– अत्र राज्ञः दुष्यन्तस्यापि बालकं प्रति वात्सल्यभावं प्रकटितम्। सः तस्य स्वरूपेण स्वभावं च दृष्ट्वा तं मुनिपुत्रं न मत्वा क्षत्रियपुत्रमेव मन्यते।

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 3

1. 'जयतु सुरभारति' इति गीतिः कस्मात् ग्रन्थात् संकलिता?
2. समरस्य सारं किमस्ति?
3. मूढैः कुत्र रत्नसंज्ञा विधीयते?
4. विद्या कैः वंद्या सदा?
5. गगने मेघान् अवलोक्य कः नन्दति?
6. प्रतापस्य प्रतिज्ञा का?
7. पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं कस्य सकाशात् शिक्षरेन्?
8. वायसस्य नाम किम्?

**उत्तरम् :**

1. 'जयतु सुरभारति' इति गीतिः 'मधुच्छन्दा' इति गीति-संग्रहात् संकलिता।
2. समरस्य सारम् रथी अस्ति।
3. मूढैः पाषाण-खण्डेषु रत्नसंज्ञा विधीयते।
4. विद्या विद्वद्भिः सदा वन्दनीया।
5. गगने मेघान् अवलोक्य मयूरः नन्दति।
6. प्रतापस्य प्रतिज्ञा आसीत्– "यावत् अहं हस्तच्युतान् स्वराज्यभागान् पुनः न प्राप्स्यामि तावत् सुवर्णपात्रेषु भोजनं न करिष्यामि, राजाप्रासादे वासं न करिष्यामि, मृदुतल्पे च शयनं न करिष्यामि"।
7. पृथिव्यां सर्वमानवाः स्वं स्वं चरित्रं एतद्देश प्रसूतस्य सकाशात् शिक्षरेन्।
8. लघुपतनकः।

**निर्देशः– प्रश्न संख्या 6-9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** शस्त्रेण रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते। 1

**उत्तरम् :**

केन रक्षिते राष्ट्रे शास्त्रचर्चा प्रवर्तते?

**7.** अल्पानां वस्तूनाम् अपि संहतिः कार्यसाधिका। 1

**उत्तरम् :**

केषां संहतिः कार्यसाधिका?

**8.** सा त्रिभुवनेषु धन्या अस्ति। 1

**उत्तरम् :**

सा केषु धन्या अस्ति?

**9.** राजानः देशरक्षाकर्त्तव्यात् विमुखाः आसन्। 1

**उत्तरम् :**

राजानः कस्मात् विमुखाः आसन्?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**उत्तरम् :**

1. परोक्षे कार्यहन्तारं प्रत्यक्ष प्रियवादिनम्।
   वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्।।
2. अनुकूले विधौ देयं यतः पूरयिता हरिः।
   प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति।।

**11.** अधोलिखितं गद्यांशं पठित्वा एकदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

दीपावली अस्माकं राष्ट्रियोत्सवः वर्तते। अस्मिन् उत्सवे सर्वे जनाः परस्परं भेदभावं विस्मृत्य आनन्दमग्नाः भवन्ति। त्रेतायुगे कैकेय्याः वरयाचनात् अयोध्यायाः राज्ञा दशरथेन रामाय चतुर्दशाणां वर्षाणां वनवासः प्रदत्तः। श्रीरामः अस्मिन् एव दिने सीतालक्ष्मणाभ्यां सह अयोध्यां प्रत्यावर्तितवान्। तान् स्वागतं व्याहर्तुम् अयोध्यावासिनः नगरे सर्वत्र दीपान् प्रज्वालितवन्तः। तदा आरभ्य अद्यावधिः प्रतिवर्षं कार्त्तिकमासे अमावस्यायां तिथौ भारते दीपावली-महोत्सवः महता उत्साहेन आयोजितः भवति।

दीपावल्यां जनाः गृहाणि परिष्कुर्वन्ति। अस्मिन्नवसरे ते स्वमित्रेभ्यः बन्धुभ्यश्च उपहारान् यच्छन्ति, परस्परम् अभिनन्दन्ति च बालकेभ्यः मिष्ठान्नं यच्छन्ति। सर्वे जनाः लक्ष्मी-गणेशयोः पूजनं कुर्वन्ति। पितरः स्वसन्ततिभ्यः स्फोटनकानि ददति। अस्मिन् महोत्सवे सर्वे सर्वेभ्यः सुखाय समृद्धये च शुभेच्छाः प्रकटयन्ति।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) कस्याः वरयाचनात् दशरथेन रामाय वनवासः प्रदत्तः? 1
   (ख) कदा जनाः गृहाणि परिष्कुर्वन्ति? 1
   (ग) सर्वे जनाः किम् विस्मृत्य आनन्दमग्नाः भवन्ति? 1
   (घ) दशरथेन रामाय कति वर्षाणां वनवासः प्रदत्तः? 1
   (ङ) भारते कदा दीपावली-महोत्सवः आयोजितः भवति? 1
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) 'राज्ञा दशरथेन' इत्यनयोः पदयोः किं विशेषणपदम्? 1
   (ख) अस्मिन् अनुच्छेदे 'ते' इति सर्वनामपदस्य स्थाने किं संज्ञापदम्? 1
   (ग) "बालकेभ्यः मिष्ठान्नं यच्छन्ति"-इति वाक्ये क्रियापदं किम्? 1
   (घ) उपर्युक्तगद्यांशात् 'दुःखाय' इति पदस्य विलोमपदं चित्वा लिखत। 1

**उत्तरम् :**

1. दीपावली-महोत्सवः।
2. (क) कैकेय्याः।
   (ख) दीपावल्याम्।
   (ग) सर्वे जनाः परस्परं भेदभावं विस्मृत्य आनन्दमग्नाः भवन्ति।

(घ) दशरथेन रामाय चतुर्दशाणां वर्षाणां वनवासः प्रदत्तः।
(ङ) भारते प्रतिवर्षं कार्तिकमासे अमावस्यायां तिथौ दीपावली–महोत्सवः आयोजितः भवति।

3. (क) राज्ञा।
(ख) जनाः।
(ग) यच्छन्ति।
(घ) सुखाय।

**12.** अधोलिखितपदयोः संधिविच्छेदं कृत्वा संधेः नामापि लिखतु।
1. भवनम् 1
2. नैवम् 1

**उत्तरम् :**
1. भो + अनम् (अयादि सन्धि)
2. न + एवम् (वृद्धि सन्धि)

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु।
1. तव + ऐश्वर्यम् 1
2. मृगः + इति 1

**उत्तरम् :**
1. तवैश्वर्यम् (वृद्धि संधि)
2. मृग इति (विसर्ग लोप संधि)

**14.** अधोलिखित वाक्येषु रेखांकित समस्त पदानां विग्रहं अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत–
1. भूकम्पः महाकम्पनं जनयति। 1
2. तव मातापितरौ कुत्र अगच्छताम्? 1
3. सः देशवासिनः यथाशक्तिः प्रबोधितवान्। 1

**उत्तरम् :**
1. महत् कम्पनम्, कर्मधारयसमासः
2. माता च पिता च, द्वंद्वसमासः
3. शक्तिम् अनतिक्रम्य इति, अव्ययीभावसमासः

**15.** निम्नलिखितवाक्येषु रेखांकितपदेषु प्रयुक्तविभक्तिं तत् कारणं च लिखत–
1. तृणात् संजायते क्षीरं। 1
2. अहं तु त्वया सह एव पठिष्यामि। 1
3. मह्यं संगीतं रोचते। 1

**उत्तरम् :**
1. पंचमी–विभक्तिः, 'जन्' धातुयोगे।
2. तृतीया–विभक्तिः, 'सह' योगे।
3. चतुर्थी–विभक्तिः, 'रुच्' धातुयोगे।

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।
1. इदं स्थलं .......... अस्ति। (रम् + अनीयर्) 1
2. बहुभाषणं .......... प्रकटयति। (मूर्ख + त्व) 1

**उत्तरम् :**
1. रमणीयम्।
2. मूर्खत्वम्।

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।
1. सः धनं लभमानः तत्र गतः। 1
2. अस्माभिः परस्परं स्नेहेन वसितव्यम्। 1

**उत्तरम् :**
1. लभ् + शानच्।
2. वस् + तव्यत्।

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| यथा, एव, कुत्र, अपि |
|---|

1. रामः .......... च इतस्तावद् वयस्य। 1
2. सा .......... गच्छति? 1
3. धर्मः .......... जयः तथा। 1

**उत्तरम् :**
1. रामः अपि च इतस्तावद् वयस्य।
2. सा कुत्र गच्छति?
3. धर्मः यथा जयः तथा।

**निर्देशः– प्रश्न संख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** रामः रावणं हन्ति। 1

**उत्तरम् :**
रामेण रावणः हन्यते।

**20.** त्वं फले खादसि। 1

**उत्तरम् :**
त्वया फले खाद्येते।

**21.** तेन पत्रं लिख्यते। 1

**उत्तरम् :**
सः पत्रं लिखति।

**22.** घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–



1. प्रातः .......... वादने विद्यालयं गच्छामि। 1
2. मध्याह्ने .......... वादने विद्यालयात् गृहम् आगच्छामि। 1

**उत्तरम् :**
1. प्रातः सपादसप्त–वादने विद्यालयं गच्छामि।
2. मध्याह्ने पादोन–एक–वादने विद्यालयात् गृहम् आगच्छामि।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–
1. आशीर्वादाः रक्षां करोति। 1
2. ते नार्यः हसन्ति। 1
3. त्वं गृहं गच्छामि। 1

**उत्तरम् :**

1. आशीर्वादाः रक्षां कुर्वन्ति।
2. ताः नार्यः हसन्ति।
3. त्वं गृहं गच्छसि।

**24.** नगरपालिकाप्रशासकाय स्वच्छता व्यवस्थायै प्रति पत्रं लिखत। 4

**उत्तरम् :**

प्रेषकः, दिनांक : 11.9.20....

प्रह्लाद चावला, पार्षदः,
सुभाषवसतिः, झालावाड़म्।

प्राप्तकर्ता–
श्रीमन्तः नगरपालिकाप्रशासकमहोदयाः,
नगरपालिका, झालावाड़म्।

**विषयः–** सुभाषवसत्याः स्वच्छता–सम्पादनार्थम्।

महोदयाः,

निवेदनमस्ति यद् अस्माकं 'सुभाषवसतिः' नाम्नि उपनगरे स्वच्छताकार्यं नैव क्रियते। अनेन कारणेन यत्र–तत्र अस्वच्छवस्तूनाम् अनियतप्रसरणं भवति। अनेन विविध रोगाणां प्रसारस्य आशंका अस्ति।

अतएव प्रार्थ्यते स्वच्छताकार्ये नियुक्तान् कर्मकरान् स्वच्छतासम्पादनार्थम् आदिशतु। आशासे, भवान् समुचितां व्यवस्थां करिष्यति।

निवेदकः
(प्रह्लाद चावला)
पार्षदः

**अथवा**

**24.** विनीतः जयपुरनगरे वसति। तस्य मित्रं प्रगीतः कर्णपुरनगरे वसति। विनीतेन गणतन्त्रदिवसस्य शोभायात्रायां भागः गृहीतः। सः स्वानुभवान् स्वमित्रं प्रगीतं प्रति पत्रे लिखति। भवान् मञ्जूषातः पदानि चित्वा पत्रं पूरयतु। 4

| **मञ्जूषा–** गृहीतः, नमस्ते, मम, वाद्यवृन्दम्, राजमार्गम्, लोकनृत्यानि, गणतन्त्रदिवससमारोहस्य, प्रमुखसञ्चालकः। |
|---|

जयपुरतः
दिनांकः 20.03.20....

प्रियमित्र प्रगीत!

..................

अत्र कुशलं तत्रास्तु। अहं ............ सज्जायां व्यस्तः आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः ...........।

अस्माकं विद्यालयस्य ........... स्वकलायाः प्रदर्शनम् अकरोत्। अहं नृत्यस्य .......... आसम्। छात्राणां राष्ट्रगानस्य ओजोयुक्तध्वनिः .......... गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रम–प्रदर्शनानि विचित्रवर्णानि परिदृश्यानि ............ च दृष्ट्वा अहं गौरवान्वितः अस्मि। ........... बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। पितरौ वन्दनीयौ।

भवतः सुहृद्
विनीतः

**उत्तरम् :**

जयपुरतः
दिनांकः 20.03.20....

प्रियमित्र प्रगीत!

नमस्ते

अत्र कुशलं तत्रास्तु। अहं गणतन्त्रदिवससमारोहस्य सज्जायां व्यस्तः आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं ददामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः गृहीतः।

अस्माकं विद्यालयस्य वाद्यवृन्दम् स्वकलायाः प्रदर्शनम् अकरोत्। अहं नृत्यस्य प्रमुखसञ्चालकः आसम्। छात्राणां राष्ट्रगानस्य ओजोयुक्तध्वनिः राजमार्गं गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रम–प्रदर्शनानि, विचित्रवर्णानि, परिदृश्यानि लोकनृत्यानि च दृष्ट्वा अहं गौरवान्वितः अस्मि। मम बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। पितरौ वन्दनीयौ।

भवतः सुहृद्
विनीतः

**25.** मञ्जूषायाः उपयुक्तपदानि गृहीत्वा द्वयोः सख्योः संवादं पूरयत। 4

| **मञ्जूषा–** स्थानान्तरणवशात्, कक्षायाम्, तव, विद्यालयात्, वससि, आगता, अहं, नवमकक्षा |
|---|

**मेघाः** – स्वागतं ते अस्यां ............।
**सुधाः** – धन्यवादाः।
**मेघाः** – प्रियसखि! किं ........... नाम?
**सुधाः** – मम नाम सुधा अस्ति।
**मेघाः** – सुधे! कस्मात् ............ आगता अस्मि?
**सुधाः** – अहं जयपुरनगरस्य केन्द्रीय विद्यालयात् आगता अस्मि।
**मेघाः** – अहमपि ............ पर्यन्तं तत्रैव अपठम्। पितु ........... अत्र आगता।
**सुधाः** – अहमपि अनेनैव कारणेन अत्र ...........।
**मेघाः** – अधुना त्वं कुत्र ...........?
**सुधाः** – अधुना ........... जवाहरनगरे वसामि।

**उत्तरम् :**

**मेघाः** – स्वागतं ते अस्यां कक्षायाम्।
**सुधाः** – धन्यवादाः।
**मेघाः** – प्रियसखि! किं तव नाम?
**सुधाः** – मम नाम सुधा अस्ति।
**मेघाः** – सुधे! कस्मात् विद्यालयात् आगता अस्मि?
**सुधाः** – अहं जयपुरनगरस्य केन्द्रीय विद्यालयात् आगता अस्मि।
**मेघाः** – अहमपि नवमकक्षा पर्यन्तं तत्रैव अपठम्। पितुः स्थानान्तरणवशात् अत्र आगता।
**सुधाः** – अहमपि अनेनैव कारणेन अत्र आगता।
**मेघाः** – अधुना त्वं कुत्र वससि?
**सुधाः** – अधुना अहम् जवाहरनगरे वसामि।

**26.** अधोलिखितषड्वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4

1. तुम दोनों पुस्तक पढ़ो।
2. पूनम संस्कृत लिखती थी।
3. वह पत्र लिखेगा।
4. मैं शहर जाऊँगा।
5. तुमने अपना पाठ पढ़ा।
6. हम सभी को अपना कार्य करना चाहिए।

**उत्तरम् :**

1. युवां पुस्तकं पठतम्।
2. पूनम संस्कृतं अलिखत्।
3. सः पत्रम् लिखिष्यति।
4. अहं नगरं गमिष्यामि।
5. त्वं स्व पाठं अपठः।
6. वयं स्वकार्यं कुर्याम।

**27.** अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट्वाक्यानि रचयतु– 3

| |
|---|
| **मञ्जूषा**– दुग्धदातृषु, कृषिप्रधाने, द्वौ श्रृंगौ, वसिष्ठ ऋषिः, अनेक वर्णाः, अमृतोपमम्। |



**उत्तरम् :**

**वाक्यानि–**

1. अस्माकं कृषिप्रधाने देशे धेनूनाम् बहुमहत्त्वं वर्तते।
2. दुग्धदातृषु पशुषु धेनूनां प्रमुखं स्थानं वर्तते।
3. वसिष्ठ ऋषिः कामधेनोः पालनं करोति स्म।
4. धेनोः द्वौ श्रृंगौ सर्वैः पूजनीयौ स्तः।
5. धेनूनाम् अनेकवर्णाः भवन्ति।
6. धेनूनाम् दुग्धं मधुरम् अमृतोपमम् च भवति।

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत– 3

| |
|---|
| **मञ्जूषा**– शिक्षा, वार्षिकोत्सवः, पुरस्कार, कार्यक्रमः, धन्यवादं, विद्यालयं। |

मम विद्यालये .......... आयोजितः। अस्मिन् अवसरे .......... मंत्री मुख्य अतिथिः आसीत्। एकः सांस्कृतिक .......... अभवत्। छात्राणां कृते ..........– वितरणम् अभवत्। छात्राः .......... वधूः इव कृतवन्तः। प्राचार्यः .......... कृतवान्।

**उत्तरम् :**

मम विद्यालये वार्षिकोत्सवः आयोजितः। अस्मिन् अवसरे शिक्षा मंत्री मुख्य अतिथिः आसीत्। एकः सांस्कृतिक कार्यक्रमः अभवत्। छात्राणां कृते पुरस्कार– वितरणम् अभवत्। छात्राः विद्यालयं वधूः इव कृतवन्तः। प्राचार्यः धन्यवादं कृतवान्।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. श्रेष्ठिपुत्रः शक्तिकुमारः चिन्तामापन्नः तत्कथं गुणवद् विन्देयं कलत्रम्।
2. अस्ति द्रविडेषु काञ्ची नाम नगरी।
3. कामपि लक्षणवतीं कन्यां विलोक्य स पृच्छति– भद्रे! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम्?
4. पेयोपहारपूर्वं भोजनं घृतसहितोदनं व्यञ्जनं च तस्मै दत्तवती।
5. ततो व्यंजनादिकं च तया सम्पादितम्।
6. भुक्ते तु तस्मिन् तयास्य शयनव्यवस्थापि कृता।

**उत्तरम् :**

1. अस्ति द्रविडेषु काञ्ची नाम नगरी।
2. श्रेष्ठिपुत्रः शक्तिकुमारः चिन्तामापन्नः तत्कथं गुणवद् विन्देयं कलत्रम्।
3. कामपि लक्षणवतीं कन्यां विलोक्य स पृच्छति–भद्रे! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम्?
4. ततो व्यंजनादिकं च तया सम्पादितम्।
5. पेयो– पहारपूर्वं भोजनं घृतसहितोदनं व्यञ्जनं च तस्मै दत्तवती।
6. भुक्ते तु तस्मिन् तयास्य शयनव्यवस्थापि कृता।

□□□□□□□